य शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ❖ तिथिर्वारश्च नक्षत्रं योगः करणमेव च ❖ श्रीसीता... ❖ लक्ष्मीः स्याद्चला तिथिश्रवणतो वारात्तथायुश्चिरं नक्षत्रं कृतपापतापशमनं योगो वियोगापहः ❖ गणाधिपोऽर्कश्च शशी धरासुतो बुधो गुरुर्भार्गवसूर्यनन्दनौ ❖
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ❖ पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत् ❖ मकरन्दानुसारि ❖ सर्वाभीष्टकरस्तथैव करणं पञ्चाङ्गमेदं स्फुटं श्रोतव्यं गणकाननात्प्रतिदिनं श्रेयस्करं सिद्धिदम् ❖ राहुश्च केतुश्च परं नवग्रहाः कुर्वन्तु वः पूर्णमनोरथान् सदा ❖

**शकाब्दः १९२३—२४**

# विश्वविद्यालय-पञ्चाङ्गम्

**संवत् २०५८—५९**

❋ जगल्लग्नम् ०८।२९।००।०० ❋

❋ वर्षलग्नम् ११।२०।००।०० ❋




## राजा-चन्द्रः

**वर्षा ७**

**धान्यम् ७**

## मन्त्री-गुरुः




| | |
|---|---|
| विक्रमसंवत् | २०५८-५९ |
| लक्ष्मणसंवत् | ८९२-९३ |
| कलिसंवत्सरः | ५१०२ |

| | |
|---|---|
| शालिवाहनशकाब्दः | १९२३-२४ |
| भारतीयस्वतन्त्राब्दः | ५४-५५ |
| अंग्रेजी | २००१-२००२ ई. |

तिथ्यम्बुवृद्धं करणारविन्दं पर्वप्रवालं सुकरावतारम्। योगोपबन्धं मनुजैरजस्रं सरोऽवगाह्यं तिथिपत्रमेतत्।।
विदेहजाजन्मभुवोऽन्तराले कामेश्वरीये सदनेऽतिरम्ये। गिरो निकेते निरतैर्निबद्धं बुधैर्विवृद्धिं लभतां सदेदम्।।
अपेक्षितं सर्वमिहोपदिष्टं विसृष्टमन्यन्न नृणां यदिष्टम्। ततोऽधिदेशं विततं मुदेऽदो विपश्चितामर्चनमातनोतु।।

**सन् १४०९ साल**

**कामेश्वरसिंह-दरभङ्गा**

**संस्कृत-विश्वविद्यालय-प्रकाशितम्**


प्रवर्तकः- डॉ. रामकरण शर्मा, पूर्वकुलपतिः, संरक्षकः- डॉ. काशीनाथ मिश्रः, कुलपतिः
निदेशकः प्रधानसम्पादकश्च- पं०श्रीरामचन्द्र झाः गणितकर्ता सम्पादकश्च पं०श्रीभारतेन्दुनाथ ठक्कुरः


**२००१ — २००२ ई०**

**सन् १४०९ साल**


❖ प्राप्तिस्थानम्- पञ्चाङ्गविभागः, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः कामेश्वरनगरम्, दरभङ्गा ८४६००८ ❖ सूचना १९२४–२५ शकाब्दस्य विश्वविद्यालयपञ्चाङ्गम् १९२४ शकाब्दस्य ज्येष्ठमासे प्रकाशमेष्यति ❖ मूल्यम् २०.०० रूप्यकाणि ❖ मुद्रकः = शुभम् प्रिन्टर्स वी.१/१५०जे.अस्सी।। दूरभाष–३१४२४५, ३६६६७३

## आनन्दादियोगचक्रम्

| योगनाम | सू. | चं. | मं. | बु. | वृ | शु | श | फलम् |
|---|---|---|---|---|---|---|---|---|
| आनन्दः | अश्वि | मृग. | आश्ले | ह. | अनु | उषा | शत | सिद्धिः |
| कालदण्डः | भ. | आ. | म. | चि. | ज्ये | अभि | पूभा | मृत्यु |
| धूम्रः | कृ. | पुन. | पूफ. | स्वा | मू | श्रव | उभा | दुःखम् |
| धाता | रो. | पु | उफ | वि | पूषा | ध | रे | शुभः |
| सौम्यः | मृ. | आश्ले. | ह. | अनु. | उषा | श | अ | सुखम् |
| ध्वांक्षः | आ. | म. | चि. | ज्ये | अभि | पूभा | भ | हानिः |
| केतुः | पुन. | पूफ. | स्वा. | मू | श्रव | उभा | कृ | दुःखम् |
| श्रीवत्सः | पु. | उफ. | वि. | पूषा | ध | रे | रो | सम्पत्तिः |
| वज्रः | आश्ले. | ह. | अनु. | उषा | श | अ | मृ | हानिः |
| मुद्गरः | म. | चि. | ज्ये. | अभि | पूभा | भ | आ | नाशः |
| छत्रम् | पूफ. | स्वा. | मू. | श्रव | उभा | कृ | पुन | सम्मानः |
| मित्रम् | उफ. | वि. | पूषा | ध | रे | रो | पु | पुष्टिः |
| मानसम् | ह. | अनु. | उषा | श | अ | मृ | आश्ले | सुखम् |
| पद्मः | चि. | ज्ये. | अभि. | पूभा | भ | आ | म | लाभः |
| लुम्बः | स्वा. | मू. | श्र. | उभा | कृ | पुन | पूफ | हानिः |
| उत्पातः | वि. | पूषा | ध. | रे | रो | पु | उफ | नाशः |
| मृत्युः | अनु. | उषा. | श. | अ | मृ | आश्ले | ह. | मृत्युः |
| काणः | ज्ये. | अभि | पूभा | भ | आ | म | चि. | क्लेशः |
| सिद्धिः | मू. | श्र. | उभा. | कृ | पुन | पूफ | स्वा | सिद्धिः |
| शुभः | पूषा. | ध. | रे | रो | पु | उफ | वि | शुभः |
| अमृतम् | उषा. | श. | अ. | मृ | आश्ले | ह. | अनु | सम्मानं |
| मुसलः | अभि. | पूभा. | भ. | आ | म | चि. | ज्ये | लाभः |
| गदः | श्र. | उभा. | कृ. | पुन | पूफ | स्वा | मू | हानिः |
| मातंगः | ध. | रे. | रो. | पु | उफ | वि | पूषा | वृद्धिः |
| राक्षसः | श. | अ. | मृ. | आश्ले | ह. | अनु | उषा | कष्टम् |
| चरः | पूभा | भः | आ. | म | चि. | ज्ये | अभि | सिद्धिः |
| सुस्थिरः | उभा. | कृ. | पुन. | पूफ | स्वा | मू | श्रव | शुभः |
| प्रवर्धमानः | रे. | रो. | पु. | उफ | वि | पूषा | ध | सुखम् |

## पंचांग देखने की विधि

इस पंचाग में सर्वप्रथम तिथि उसके बाद सूर्यादि दिन का नाम एवं तिथि का दण्डपलात्मक मान, तिथि का घंटा मिनट,उसके बाद नक्षत्र का नाम, दण्डपल एवं घंटा मिनटात्मक मान, उसके बाद क्रमशःयोग एवं करणके दण्डपलात्मक मान, मेषादि राशि में चन्द्रमा की अवस्थिति दण्डपल एवं घण्टामिनंट्रात्मक समय, उसके बाद क्रमशः सूर्य का मिश्रमानकालिक (मध्यरात्रिकालिक) स्पष्टराश्यादि, दण्ड-पलात्मक दिनमान, घण्टामिनटात्मक सूर्योदयास्त तथा राष्ट्रीय, सौर (गते) एवं अंग्रेजी तिथियाँ है। उसके बाद उस दिन के मुहूर्त्त एवं पर्वादि दिए गए हैं। यथा—श्रावणकृष्ण १ शुक्र को प्रतिपदा का दण्डपलात्मक मान ३८/५४ (रात घंटा ८ मिनट ४६) तक पूर्वाषाढ़ का दण्डपल ११/२५ (दिन घंटा ९ मिनट ४६) तक आदि सारी बाते इसी तरह जाननी चाहिये। पंचाग के निचले भाग में निशीथ (मिश्रमान)कालिक दैनिक स्पष्टग्रह एवं दण्डपलात्मक मिश्रमान दिया गया है। यथा— श्रावणकृष्णप्रतिपदा शुक्र को मिश्रमानकालिक स्पष्टमंगल राश्यादि ७।२०।३४।४६ तथा स्पष्ट बुध राश्यादि २।२।४७।०२ आदि। दो दिनों के स्पष्टग्रहों का अन्तर ग्रह की दैनिक गति होती है। यथा—श्रावणकृष्ण प्रतिपदा शुक्र एवं द्वितिया शनि के स्पष्ट मंगल का अन्तर ०४।३३ कलादि दैनिक गति मंगल की हुई। इसी तरह अन्य ग्रहों की भी गति समझनी चाहिये। इसके बाद इसी चक्र के अन्तिम भाग में दैनिक लग्नसारिणी दी गई है। सुविधा की दृष्टि से प्रतिदिन मेष से आरम्भ कर मीन तक के लग्नों का मान रेलवे घड़ी के अनुसार लिखे गये हैं। अर्थात् १३,१४आदि घण्टे से दिन के १,२आदि घण्टे तथ शून्य घंटे से २४ यानि १२ बजे रात्रि समझना चाहिये। यथा—श्रवणकृष्णप्रतिपदा शुक्र को रात्रि ००।२३ बजे से १।४९ तक मेष,१।५० बजे से ३।४५तक वृष,३।४६से ५।५८तक मिथुन, ५।५९से ८।२६ दिन तक कर्क, ८।२७से १०।३२तक सिंह,१०।३३से १२।४७तक कन्या,१२।४८ बजे दिन से १५।०५तक तुला,१५।०६से १७।२३तक वृश्चिक १७।२४से १९।२८ सायं तक धनु, १९।२९से २१।२६रात तक मकर,२१।२५से २२।४५रात्रि तक कुम्भ, एवं २२।४६से ०१।२२ रात्रि तक मीन लग्न रहेगा। इसीतरह प्रतिदिन समझना चाहिये। पाक्षिक विषयों के साथ–साथ अन्य उपयोगी विषय'अथ विविधविषयाः' में दिये गये हैं। उसके बाद पाक्षिक वातावरण एवं ग्रहस्थिति (ग्रहों के उदय, अस्त, वक्र या मार्ग)लिखी गई है। शुद्धादि विषयों की सुविधापूर्वक जानकारी के लिए प्रत्येक पक्ष में पंचाग के ऊपरी भाग दाई ओर गुरु और शुक्र के उदयास्त एवं शुद्धादि विवरण दिये गये हैं। ताकि सामान्य जानकारी रखनेवालों को भी सुविधा हो। शमिति।

**मिश्रमान (निशीथ) कालिकग्रह से इष्टकालिकग्रहस्पष्टीकरण,** यथा—श्रावणकृष्ण ०२शनि को ३०।२८दण्डादि पर स्पष्ट मंगल बनाना है तो मिश्रमानवारादि ३।४६।५८एवं इष्टकालवारादि ३।३०।२८का अन्तर १६।३०मिश्रेष्टान्तरऋणदण्डादि। तथा (७।२०।३४।४६)—(७।२०।२९।५६) = ०४।५० मंगल की गति कलादि। अतः (१६।३०) x (०४।५०) = ०१।२० कलादि फल। अब (७।२०।२९।५६)+(०१।२०) =७।२०।३१।२६ = इष्टकालिक मंगल। इसी तरह सभी ग्रह बनाना चाहियें।

## समर्थका विद्वांसः

- पं श्री कृष्णानन्द झा, व्याकरण—विभागाध्यक्षः
- पं श्री लक्ष्मीनाथ झा, साहित्य—विभागाध्यक्षः
- पं श्री भगीरथ मिश्र, दर्शन—विभागाध्यक्षः
- पं श्री रामचन्द्र झा, ज्यौतिष—विभागाध्यक्षः
- पं श्री उपेन्द्र झा, वेद—विभागाध्यक्षः
- पं श्री वाचस्पति शर्मा त्रिपाठी, धर्मशास्त्र—विभागाध्यक्षः

| | | |
|---|---|---|
| पं श्री देवन्द्र झा | पं श्री कीर्त्यानन्द झा | पं श्री दिगम्बर झा |
| पं श्री विधाता मिश्र | पं श्री रतिनाथ झा | पं श्री कालिकादत्त झा |
| पं श्री शशिनाथ झा | पं श्री श्रुतिधर झा | पं श्री श्रीनारायण मिश्र |
| पं श्री सुरेश्वर झा | पं श्री सुरेन्द्र झा | पं श्री किशोर नाथ झा |
| पं श्री शिवकान्त झा | पं श्री प्रभुनारायण शर्मा | पं श्री उमा रमण झा |
| पं श्री रत्नेश्वर झा | पं श्री बौआनन्द झा | पं श्री चन्द्रकिशोर झा |
| पं श्री शिवाकान्त झा | पं श्री कमलेश झा | पं श्री देवनारायण शर्मा |
| पं श्री रतीश झा | पं श्री विकाऊ झा | पं श्री हरिहर झा |
| पं श्री रामजी ठाकुर | पं श्री देवनारायण झा | पं श्री गणेशकान्त झा |
| पं श्री उमाकान्त झा | पं श्रीमती मीना कुमारी | पं श्री त्रिलोकनाथ झा |
| पं श्रीगणेश शर्मा | पं श्री श्रीपति त्रिपाठी | पं श्री पुरुषोत्तम झा |
| पं श्री कमलाकान्त झा | पं श्री शोभाकान्त झा | पं श्री फूलकुमार झा |
| पं श्री रमाकान्त मिश्र | पं. श्री काशीनाथ मिश्र | पं श्री हेमनारायण चतुर्वेदी |
| पं श्री चन्द्रनाथ मिश्र | पं श्री माधव झा | पं श्री वेदानन्द झा |
| पं श्री रामसेवक झा | पं श्री अर्जुन झा | पं श्री ताराकन्त झा |

| | |
|---|---|
| पं श्री वटेश झा | पं श्री गंगाधर झा |
| पं श्री विदेश्वर झा | पं श्री हरिश्चन्द्र झा |
| पं श्री शोभाकान्त मिश्र | पं श्री सूर्यकान्त झा |
| पं श्री विद्यानाथ झा | पं श्री अजबलाल झा |
| पं श्री रामगुलाम मिश्र | पं श्री तारणीश झा |
| पं श्री सर्वनारायण झा | पं श्री बलभद्र झा |
| पं श्री अमरनाथ झा | पं श्री श्रीधर त्रिपाठी |
| पं श्री चतुरानन मिश्र | पं श्री वैद्यनाथ मिश्र |
| पं श्री धनेश्वर झा | पं श्री गंगाधर राय |
| पं श्री शिवकुमार शर्मा | पं श्री नित्यानन्द झा |
| पं श्री रामजीवन मिश्र | पं श्री सच्चिदानन्द मिश्र |
| पं श्री रुद्रकान्त मिश्र | पं श्री शशिधर मिश्र |
| पं श्री रामनारायण झा | पं श्री हेराम शर्मा |
| पं० श्री सत्यनारायण पाठक | पं श्री हरिकान्त झा |
| पं श्री गंगाधर मिश्र | पं श्री देवकान्त झा |
| पं श्री सिंहेश्वर झा | पं श्री पालन झा |
| पं श्री धीरेन्द्र झा | पं श्री नन्दकिशोर पाण्डेय |
| पं श्री चण्डेश्वर झा | पं श्री रामलखन झा |
| पं श्री षडानन मिश्र | पं श्री राजकुमार झा |
| पं श्री अच्युतानन्द झा | पं श्री मनोरंजन दूबे |
| पं श्री शिवनाथ झा | पं श्री राधारमण झा |
| पं श्री गुणानन्द झा | पं श्री कुलानन्द झा |
| पं श्री श्यामनन्दन मिश्र | पं श्री उपेन्द्र झा 'विमल' |
| पं श्री भगवानदत्त मिश्र | पं श्री विद्येश्वर झा |
| पं श्री फूलेन्द्र झा | पं श्री कालीकान्त मिश्र |
| पं श्री कृपाकान्त ठाकुर | पं श्री ब्रह्मदेव मिश्र |
| पं श्री तारकेश्वर त्रिपाठी | पं श्री महेश शर्मा |
| पं श्री विद्याधर मिश्र | पं श्री गोविन्द झा |
| पं श्री विलट झा | पं श्री उग्रानन्द प्रतिहस्त |
| पं श्री शक्तिधर झा | पं श्री रामलखन शर्मा |
| पं श्री श्यामानन्द झा | पं श्री लालन झा |
| पं श्री महेश झा | पं श्री दुर्गानाथ झा |

| | |
|---|---|
| पं श्री शंकरजी झा | पं श्री गणेश झा |
| पं श्री गोलोकनाथ झा | पं श्री वटोही झा |
| पं श्री निरसु झा | पं श्री कमलाकान्त मिश्र |
| पं श्री योगानन्द चौधरी | पं श्री श्रीरामकुमार शर्मा |
| पं श्री हरेन्द्रकिशोर झा | पं श्री भूपनारायण मिश्र |
| पं श्री युक्तिनाथ झा | पं श्री तेजनारायण झा |
| पं श्री कुलानन्द झा | पं श्री राजेन्द्र झा |
| पं श्री कामेश्वर मिश्र | पं श्री रतीशचन्द्र झा |
| पं श्री रामविलास झा | पं श्री विष्णुदेव झा |
| पं श्री भोलानाथ मिश्र | पं श्री दिनेश झा |
| पं श्री रामक ण झा | पं श्री हर्षनाथ झा |
| पं श्री हरिश्चन्द्र झा | पं श्री योगेश्वर झा |
| पं श्री कपिलेश्वर झा | पं श्री दामोदर झा |
| पं श्री लक्ष्मीकान्त मिश्र | पं श्री वैद्यनाथ झा |
| पं श्री मधुकान्त झा | पं श्री कौशलेन्द्र झा |
| पं श्री शिवानन्द झा | पं श्री राजेश्वर झा |
| पं श्री खगेश झा | पं श्री बच्चा झा |
| पं श्री भक्तिनाथ सिंह ठाकुर | पं श्री कृष्णकान्त झा |
| पं श्री शंकर त्रिपाठी | पं श्री भुवनेश्वर झा |
| पं श्री जगन्नाथ मिश्र | पं श्री फूलचन्द्र मिश्र |
| पं श्री सदानन्द झा | पं श्रीउदितनारायण झा |
| पं श्री राधाकान्त ठाकुर | पं श्री श्रीकान्त प्रतिहस्त |
| पं श्री मुनीन्द्र झा | पं श्री कमलाकान्त ठाकुर |
| पं श्री शुकदेव शर्मा | पं श्रीभागवत ठाकुर |
| पं श्री गणेश चौधरी | पं श्री वीरचन्द्र राय |
| पं श्री प्रेमकान्त झा | पं श्री कलाधर झा |
| पं श्री हृषीकेश झा | पं श्री दिवाकर शास्त्री |
| पं श्री खगेन्द्रनाथ झा | पं श्री रघुवीर झा |
| पं श्री जगदीश मिश्र | पं श्री विश्वनाथ झा |
| पं श्री हंसधर झा | पं श्री हरिनारायण ठाकुर |
| पं श्री महानन्द ठाकुर | पं श्री कृष्णमोहन पाठक |
| पं श्री राधाकान्त मिश्र | पं श्री शक्तिनन्दन झा |
| पं श्री चिरंजीव मिश्र | पं श्री इन्दुनाथ ठाकुर |

# श्रीमङ्गलमूर्त्तये नमः ✲ श्रीसरस्वत्यै नमः

शकाब्दः१९२३—२४, विक्रमसंवत्२०५८—५९, सन् १४०९ साल, लक्ष्मणसंवत् ८९२—९३, अंग्रेजी २००१—२००२ ई. तत्र प्रभवादिगताब्दादयः२७।२०।०६।३७।२७, तद्भोग्याब्दादयश्च ३२।०१।२३।२२।३३।। अत्र विद्यमाने गुणनेत्रनवेन्दुमिते शकाब्दे विष्णुविंशतिकायामहिर्बुध्न्यदैवतयुगेऽष्टाविंशतिजयनामा मध्यमगुरुसंवत्सरफलम्—

क्षत्रियाश्च तथा वैश्या शूद्राश्च नटनर्त्तकाः। पीडितास्ते वरारोहे जये सर्वार्थसंपदः।।

## ● वर्षेश (राजा) चन्द्रफलम् ●

वृक्षाःसद्दलतां प्रयान्ति विविधाः स्फीता भवेन्मेदिनी
गावःक्षीरयुता द्विजा बहुधनैरुन्मत्तचित्तोद्धताः।
शस्यानां च विवर्द्धनं जलमयं शीतांशुवर्षाधिपे
रोगानां च विनाशनं नरपतिर्दीर्घायुराण्डले।।

## ● संवाहक (मन्त्री) गुरुफलम् ●

मेघोनेकजलं ददाति बहुशो विप्राःसदा सुस्थिराः
पृथ्वी शस्यसमाकुला च नियतं लोकाः प्रमोदाकुलाः।
राजानः सचिवोपकारनिरताः प्रोद्भूतमोदाकुलाः
कन्दर्पातिकथाप्रवृत्तिमनसःसम्वाहके चेद् गुरौ।।

## ● पालक—शनिफलम् ●

पृथ्वी शस्यसमूहघातविहिता दग्धा रवेर्दीधितेः
मेघा यान्ति च लाघवं जलकृता रोगेन पूर्णा नराः।
सर्पैर्व्याकुलिता हता उपहताश्चौरैर्गृहीतार्थका
गोस्त्रीगर्भविनाशनं भवति वै सूर्यात्मजे पालके।।

मेघेशसूर्यफलम्— किञ्चित्तोयं विमुञ्चन्ति जलदाश्चित्रितं रवौ।
तोयेशचन्द्रफलम्— तोयसंघयुता चन्द्रे सस्यसंघयुता मही।।
शस्येश शनिफलम्— शनौ शस्याधिपे शस्यग्शस्तोयविशोषणम्। दुखैर्व्याकुलिता पृथ्वी गोस्त्रीगर्भविनाशनम्।।
लोकेशकुजफलम्— कुजे कुचैलिनः क्रूराःकुत्सिताश्च कुचेष्टिताः। धनधर्मक्रिया हीना नित्योत्सवरता नराः।।
सांवर्त्तकमेघफलम्— संवर्तके महावृष्टिः शस्यवृद्धिकरी शुभा। जलपूर्णा मही नित्यं जलदैर्वेष्टितं नभः।।
तटगतरोहिणीफलम्— तट्गता यदि सा शुभवृष्टिदा।। तटे वृष्टिस्तु शोभना।।
चैत्रशुक्लप्रतिपच्चन्द्रफलम्— चन्द्रस्य वारो बहुवृष्टिदः स्यात्।
पौषामावास्यारविफलम्— बहुधनैर्धरणी परिपूरिता सकलशस्ययुता मुदितप्रजा।।
आर्द्राप्रवेशफलम्— धान्यखण्डवृष्टिप्रदम्।। होलिकाफलम्—शोभनम्।। दीपावलीफलम्—शुभदम्।।

मेषसंक्रान्तिफलम्— शुभकारकम्।। शकाब्दफलम्—साम्यमतिवृष्टिश्च।।
विक्रमाब्दफलम्— विकलताकरं दुर्भिक्षकरञ्च।। शारदीयनवरात्रफलं—शुभकरम्।।
जलाढकमानम्— १०० तत्र समुद्रे ५०, पर्वते ३० भूमौ २०।।

## ● वर्षादिविश्वाः ●

वर्षा ७ धान्यं ७ शीतं ९ तृणं १५ उष्णं ११ उत्सवः १३ प्रजावृद्धिः १५ प्रजाक्षयः १५ विग्रहः ११ क्षुधा १३ तृष्णा ७ निद्रा ५ आलस्यं ९ उद्यमः ९ शान्तिः ५ क्रोधः ११ दण्डः ३ मैत्री १ पुण्यं ११ रसादि ९ उग्रत्वं ९ रसोत्पत्तिः ५ फलोत्पत्तिः १३ रोगः १३ रोगक्षयः ११ आचारः ११ अनाचारः १७ मरणं १५ जननं ७ चौरभयं १३ चौरशान्तिः १९ अग्निभयं ९ अग्निशान्तिः १९।।

## ● मेषादिराशीनां सफलमायव्ययचक्रम् ●

| राशिः | मेषः | वृषः | मिथुनं | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| आयः | १४ | ८ | ११ | ५ | ८ | ११ | ८ | १४ | २ | ५ | ५ | २ |
| व्ययः | २ | ११ | ८ | ८ | २ | ८ | ११ | २ | ११ | ५ | ५ | ११ |
| फलम् | विजयः | सम्मानं | सम्मानं | रोगः | लाभः | सम्मानं | सम्मानं | विजयः | रोगः | लाभः | लाभः | रोगः |

## ● १९२३—२४ शकाब्दीय शुद्ध्यशुद्धी ●

श्रावणकृष्णैकादश्यां कुजे ३।५६ यावद् गुर्वादित्यगुरुबाल्यदोषाभ्यामशुद्धस्तन्मानं मासादि ००।२१।०३।५६।। ततो भाद्रकृष्णत्रयोदश्यां भृगौ १६।३२ यावच्छुद्धस्तन्मानं मासादि १।२।२२।३६।। ततः सिंहादित्यमलमासदोषाभ्यां द्वितीयाश्विनकृष्णामायां भौमे ४८।२० यावदशुद्धस्तन्मानं मासादि २।००।३१।०८।। ततः कार्त्तिककृष्णप्रतिपदि भृगौ ४४।०५ यावच्छुद्धस्तन्मानं मासादि ०।२६।५५।५५।। ततो गुरुवक्रभृगुक्षैण्यास्तबाल्यधनुरादित्यदोषेभ्यःफाल्गुनकृष्णप्रतिपदि गुरौ ३१।३० यावदशुद्धस्तन्मानं मासादि ३।२७।४७।२५।। ततो ज्येष्ठशुक्लपञ्चम्यां शनौ २५।४७ यावच्छुद्धस्तन्मानं मासादि ३।२६।५४।२७।। ततो गुर्वादित्यगुरुक्षैण्यास्तदोषेभ्य आषाढीं यावदशुद्धस्तन्मानं मासादि १।१९।३४।२३।। अतो वर्षेऽशुद्धसमयना। मासादि ७।२८।५७।२२।। शुद्धसमयमानं मासादि ५।५।२।४८।। तेन वर्षपूर्त्तिदिनानि ३८४ इति।।

## ● १९२३—२४ शकाब्दीयशुद्धादि ●

फाल्गुनादिज्येष्ठान्तमासेषु समयशुद्धिस्तत्रोपनयनविवाहादिशुभमुहूर्त्ता यत्र। गुरुस्तदानीं मिथुनराशौ। कार्त्तिके समयाशुद्धिस्तेनैकादशीकार्त्तिकादिव्रतोद्यापनं नैव। मार्गे पूर्वास्तः शुक्रस्तेन तृतीयादि— विषमवर्षीयद्विरागमनदिनानि नैव। फाल्गुने वैशाखे च पश्चिमोदितः शुक्रस्तेन पूर्वोत्तरदिशोस्तृतीयादिवर्षीयद्विरागमनदिनानि बहूनि परञ्च पश्चिमदक्षिणदिशोर्द्विरागमनदिनानि शुक्रान्ध (रे.अश्वि.रो.मृग.) नक्षत्रेषु वैशाखे एव।

## ● सन् १४१० साल, १९२४—२५ शकाब्दीयसंक्षिप्तशुद्धादि ●

मार्ग—फाल्गुन—वैशाखेषु पूर्वोदितः शुक्रस्तेन तृतीयादिविषमवर्षीयपश्चिमदक्षिणदिशोर्द्विरागमनदिनानि बहूनि, तदितरदिशोः पूर्वोत्तरयोर्द्विरागमनदिनानि शुक्रान्ध (रे.अश्वि.रो.मृ.) नक्षत्रेषु फाल्गुनवैशाखयोरेव। कार्त्तिके कार्त्तिकादिव्रतोद्यापनम्। मार्गमाघफाल्गुनवैशाखज्येष्ठाषाढेषु विवाहादिमहूर्त्ताः। माघादिज्येष्ठान्तमासेषूपनयनदिनानि। गुरुस्तदानीं कर्के।

## ❁ वर्षफलम् ❁

इस वर्ष के राजा चन्द्रमा, मन्त्री वृहस्पति, पालक—शनि, मेघपति सूर्य, जलपति चन्द्रमा, शस्यपति शनि, लोकपति मंगल, सांवर्त्तक नामक मेघ एवं रोहिणीवास तट में है। वर्षा ७ विश्वा एवं धान्य ७ विश्वा है। जलाढकमान २० एवं परिवहनामक वायु है। वर्षारंभ में जयनामक बार्हस्पत्यवर्ष तथा श्रावणशुक्ल पूर्णिमा शनि ४०।७ दण्डादि से मन्मथनामक बार्हस्पत्य वर्ष प्रारंभ होगा। जगल्लग्न—जगल्लग्नेश, वर्षलग्न—वर्षलग्नेश, राजा—मन्त्री में सम—मित्रभाव, अधिकारियों में शुभग्रहों की अल्पता एवं अन्य ग्रहस्थितियों के आधार पर शासकवर्ग में मत—भेद के बावजूद परिणामतः मतैक्य की स्थिति रहेगी। विकासमूलक जनकल्याण के कार्य होंगें। शिक्षा, विज्ञान, उद्योग, व्यापार, जलसाधन, संचार, वैदेशिक नीति एवं पर्यावरण के क्षेत्र में महत्वपूर्ण प्रगतिमूलक कार्य होंगे। आर्थिक स्थिति, खाद्यान्न एवं चिकित्सा के क्षेत्रों में उन्नति होगी। नवीन अनुसन्धानात्मक कार्य में प्रगति होगी। प्रजा में सत्कार्य के प्रति रुचि उत्पन्न होगी। सद्भावना एवं सहयोग के बावजूद विश्वस्तर पर आभ्यन्तर वैमनस्य, द्वन्द्व एवं शस्त्रास्त्र निर्माण में वृद्धि होगी। कहीं कहीं विद्वेष, संघर्ष, तास्करोपद्रव एवं कलहकर स्थिति हो सकती है। महामारी, अग्निभय, हिंसा, हिमपात, दुर्घटना, प्राकृतिक उत्पात, गर्मी की अधिकता एवं रोगाधिक्य से धन—जन की हानि संभव है। वर्षा की स्थिति अच्छी रहेगी किन्तु खण्डवृष्टि एवं बाढ़ से कहीं—कहीं फसल को क्षति हो सकती है। भादो, अगहनी एवं चैत्री फसल की उपज ८५, ६० एवं ८० प्रतिशत होगी। अशुभशान्तिपूर्वक मंगल की कामना से यज्ञ, हरिकीर्त्तन, भगवन्नामस्मरण एवं दानादि धर्मकृत्य करना चाहिए।

## ❁ मासफलम् ❁

**श्रावण—** इस मास में ५ सोमदिन सूर्यसंक्रान्तिमुहूर्त ३०, चन्द्रदर्शनमुहूर्त १५ तथा चार ग्रहों का योग है। अतः अन्न, वस्त्र, फल, रस, तेलहन, धातुपदार्थ खनिजपदार्थ, गृहोपकरण एवं काष्ठोपकरण के भाव में तेजी आएगी। मुख्य रूप से श्वेत पदार्थ में तेजी आएगी। वृष्टि, बाढ एवं हिमपात से फसल को आंशिक क्षति होगी। दुर्घटना, उत्पात एवं कलह से धनजन की हानि संभावित है। शान्त्यर्थ धर्मकृत्य करना चाहिए।

**भादव—** इस मास में ५ शुक्रदिन, सूर्यसंक्रान्तिमुहूर्त एवं चन्द्रदर्शनमुहूर्त ३० है। अतः अन्न, रस पदार्थ, फल, तेलहन एवं वस्त्र आदि के भाव में समता रहेगी। धातुपदार्थ, खनिजपदार्थ एवं गृहोपकरण मे तेजी के बाद सरती का रुख रहेगा। खण्डवृष्टि एवं बाढ से फसल की क्षति संभावित है। उत्पात, दुर्घटना एवं कलह की स्थिति में कमी आएगी। सत्कार्य होंगे।

**आश्विन–** इस मास में ५ सोमदिन, सूर्यसंक्रान्तिमुहूर्त ४५ एवं चन्द्रदर्शनमुहूर्त ३० है। अत: अन्न, फल, रस, धातुपदार्थ, खनिजपदार्थ, वस्त्र एवं गृहोपकरण आदि सभी के भाव में सस्ती का क्रम रहेगा। इस महीने में मलमास भी है। अत: विदेश के लोगों से उपद्रव, चोरभय तथा दक्षिणभाग में दुर्भिक्ष की संभावना रहेगी, शेष भागों में सुभिक्ष एवं कल्याण कर स्थिति रहेगी। बाढ एवं वर्षा से अधिक क्षति हो सकती है। शान्त्यर्थ धर्मकृत्य करना चाहिए।

**कार्तिक–** इस मास में ५ बुधदिन, सूर्यसंक्रान्तिमुहूर्त १५ एवं चन्द्रदर्शनमुहूर्त ४५ है। अत: इस महीने में श्वेतपदार्थ, वस्त्र आदि अपेक्षाकृत सस्ता रहेगा किन्तु लाल या काला पदार्थ, धातुपदार्थ, खनिजपदार्थ, गृहोपकरण आदि की कीमत में तेजी आएगी। वायु खण्डवृष्टि संभावित है। दुर्घटना एवं उत्पात में वृद्धि हो सकती है, शान्त्यर्थ धर्मकृत्य करना चाहिए।

**अगहन–** इस मास में ५ शुक्रदिन, सूर्यसंक्रान्तिमुहूर्त १५ एवं चन्द्रदर्शनमुहूर्त ३० है। इस महीने में भी गतमास की तरह सभी वस्तुओं के भाव में तेजी का रुख रहेगा। श्वेतपदार्थ अपेक्षाकृत सम रहेगा। घी, शाक एव रसपदार्थ में पूर्वार्द्ध की अपेक्षा उत्तरार्द्ध में कुछ तेजी आ सकती है। उत्पात या दुर्घटना में कमी होगी। विकासोन्मुख कार्य सम्पादित होंगे।

**पौष–** इस मास में ५ रविदिन, सूर्यसंक्रान्तिमुहूर्त ३०, चन्द्रदर्शनमुहूर्त ३० तथा चार ग्रहों का योग है। अत: खाद्यपदार्थ, फल, शाक, धातुपदार्थ, खनिज पदार्थ, गृहोपकरण एवं काष्ठोपकरण आदि सभी चीजों के भाव में साम्य रहेगा। उत्तरार्द्ध में साधारण तेजी आ सकती है। उपल के साथ स्वल्पवृष्टि संभावित है। शीतवृद्धि एवं प्राकृतिक उत्पात या दुर्घटना संभावित है। शान्त्यर्थ धर्मकृत्य करना चाहिए।

**माघ–** इस मास में ५ सोमदिन, सूर्यसंक्रान्तिमुहूर्त ३० एवं चन्द्रदर्शनमुहूर्त ३० है। खाद्यान्न, धातुपदार्थ, खनिजपदार्थ एवं वस्त्र आदि के भाव में साम्य रहेगा। रसपदार्थ, श्वेतपदार्थ अपेक्षाकृत सस्ते रहेंगे। शीतवृद्धि, दुर्घटना एवं प्राकृतिक उत्पात संभावित है। उपल के साथ वायु एवं स्वल्पवृष्टि संभावित है। शान्त्यर्थ धर्मकृत्य करना चाहिए।

**फाल्गुन–** इस मास में ५ मंगलदिन, सूर्यसंक्रान्तिमुहूर्त १५ एवं चन्द्रदर्शनमुहूर्त ३० है। अत: खाद्यान्न, रसपदार्थ, वस्त्र धातुपदार्थ तथा श्वेतवस्तु प्रभृति पदार्थों का भाव सम रहेगा किन्तु कृष्णपदार्थ या रक्तपदार्थ, फल, शाक आदि के भाव में तेजी आएगी। झंझावात दुर्घटना, उपद्रव एवं प्राकृतिक उत्पात संभावित है। शान्त्यर्थ धर्माचरण श्रेयस्कर होगा।

**चैत्र–** इस मास में ५ वृहस्पतिदिन, सूर्यसंक्रान्तिमुहूर्त ४५ एवं चन्द्रदर्शनमुहूर्त ३० है। अत: खाद्यान्न, रस पदार्थ, धातुपदार्थ, खनिजपदार्थ, काष्ठोपकरण एवं गृहोपकरण के भाव में साम्य–सस्ता का क्रम रहेगा। उत्तरार्द्ध में श्वेतवस्त्र, फल, शाक आदि में अपेक्षाकृत तेजी का रुख रहेगा। मासान्त में झंझावात, तूफान, प्राकृतिक उत्पात एवं दुर्घटना भी संभावित है। शान्त्यर्थ धर्मकृत्य करना चाहिए।

**वैशाख–** इस मास में ५ रविदिन, सूर्यसंक्रान्तिमुहूर्त १५ एवं चन्द्रदर्शनमुहूर्त १५ है। अत: खाद्यान्न तेलहन, दलहन, वस्त्र, रसपदार्थ, फल, शाक, धातुपदार्थ, खनिजपदार्थ, गृहोपकरण एवं काष्ठोपकरण आदि सभी वस्तुओं के भाव में तेजी आएगी। छह ग्रहों के योग झंझावात, प्राकृतिक उत्पात, तूफान, भूकम्प, उपद्रव, युद्ध, रोगभय एव दुर्घटना सूचक है। धर्मकृत्य करना श्रेयस्कर होगा।

**ज्येष्ठ–** इस मास में ५ बुधदिन, सूर्यसंक्रान्तिमुहूर्त ३० एवं चन्द्रदर्शनमुहूर्त ३० है। अत: पूर्वमासापेक्षया वस्तुओं के मूल्य में कमी आएगी तथा इसके भाव में उतार चढाव का क्रम रहेगा। पञ्चग्रहयोग उपद्रव, दुर्घटना, कलह एवं प्राकृतिक उत्पात सूचक है। झंझावात एवं तापवृद्धि भी संभावित है। शान्त्यर्थ धर्मकृत्य करना चाहिए।

**आषाढ–** इस मास में ५ शनिदिन, सूर्यसंक्रान्तिमुहूर्त १५ एवं चन्द्रदर्शनमुहूर्त १५ है। अत: सभी वस्तुओं की कीमत में वृद्धि की संभावना है। काले और लाल पदार्थ अपेक्षाकृत अधिक प्रभावित होंगे। प्राकृतिक उत्पात, उपद्रव, कलह, महामारी एवं रोगभय की संभावना रहेगी। झंझावात एवं तापवृद्धि भी संभावित है। धर्मकृत्य करना चाहिए।

## राशिफलम्

**मेष–** (चु, चे, चो, ल, लि, लु, ले, लो, अ)– शनि की साढे साती अन्तिम चरण में है। अत: व्यय, चञ्चलता, वैमनस्य, उदर–वातपीडा, श्रमाधिक्य, निरर्थक भ्रमण एवं लोकापवाद संभव है किन्तु इसके साथ साथ कार्य में बाधा एवं विलम्ब के बाद सफलता, सन्तान की अभ्युन्नति, व्यापार, एवं उद्योग के क्षेत्र में उपेक्षाकृत लाभकर स्थिति, शिक्षा एवं राजनीति में सफलता मिलेगी। शनि की शान्ति के लिए हनुमत्पूजन–दर्शन, कृष्णगोदर्शन, मंगलव्रत, शनिपूजन–दान–स्तोत्र पाठ–मन्त्रजप, सुन्दरकाण्डपाठ अथवा दुर्गापाठ, शनि दिन अश्वत्थमूल में जल–गुड–तिलदान, तिलतैल से हनुमद्दीपदान, काले घोडा नाल के लोहे की अंगूठी अथवा वृषोत्सर्ग के दगनी लोहे की अंगूठी शनि दिन बामहाथ की मध्यमा अंगुली में धारण करें।

**वृष–** (इ, उ, ए, ओ, व, वि, वु, वे, वो)– शनि की साढेसाती चल रही है। अत: कार्य में बाधा, वायुपीडा, उदर–रक्तविकार, व्रण, रोग–शत्रुकोप, झंझट या अशान्तिकरस्थिति, उद्योग–व्यापार में अपेक्षाकृत न्यून लाभ, व्यय एवं निरर्थक भ्रमण संभावित है। सन्तान एवं पारिवारिक सुख अनुकूल रहेगा। आकस्मिक लाभ सम्भव है। मेष राशिवत् शनि की एवं केतु की उपासना लाभकारक होगी।

**मिथुन–** (क, कि, कु, घ, ङ, छ, के, को, ह)– शनि की साढे साती चल रही है। अत: वायुरक्त विकार से पीडा, व्यय एवं अशान्ति कर स्थिति संभावित है किन्तु इसके साथ साथ, सन्तान–पारिवारिकसुख, सामाजिक प्रतिष्ठा, सत्कार्य में व्यय, उद्योग व्यापार में स्वल्पलाभ, भ्रमण एवं तीर्थाटन, शैक्षणिकक्षेत्र में प्रगति, मित्र सहायता एवं धर्मकृत्य सम्पादन होगा। मेषराशिवत् शनि की तथा गुरु की एवं चैत्र से राहु की उपसना लाभकरहोगी।

**कर्क–** (हि, हु, हे, हो, ड, डि, डु, डे, डो)– सत्कार्य में व्यय, सन्तान की अभ्युन्नति, पारिवारिक सुख, नवीन कार्यारंभ में सफलता, उद्योग–व्यापार में लाभ, प्रभाववर्द्धक स्थिति, शिक्षा के क्षेत्र में सफलता तथा भ्रमण–तीर्थाटन संभावित है। वायुविकारजन्यपीडा घाव, अशान्ति एवं नेत्रपीडा हो सकती है। अत: चैत्र तक राहु की तथा गुरु की उपासना लाभकर होगी।

**सिंह–** (म, मि, मु, मे, मो, ट, टि, टु, टे)– स्वास्थ्य अनुकूल रहेगा परिवार सन्तानसुख उद्योग–व्यापार में सफलता, नवीन कार्यारंभ से लाभ, शैक्षणिक क्षेत्र में सफलता, सामाजिक यश राजनीतिक सफलता, भ्रमण, शत्रुपर विजय, प्रभाववर्द्धक स्थिति एवं आर्थिक लाभ संभावित है। सूर्य की उपासना लाभकर होगी।

**कन्या–** (टो, प, पि, पु, ष, ण, ठ, पे, पो)– स्वास्थ्य अनुकूल, पारिवारिकसुख उत्तम, सन्तान की अभ्युन्नति, शिक्षा के क्षेत्र में सफलता, नवीन कार्यारंभ में लाभ, उद्योग–व्यापार में सफलता एवं लाभकारक स्थिति, सामाजिक प्रतिष्ठा, प्रभाववर्द्धक स्थिति, तीर्थाटन एवं धर्मकृत्य में व्यय तथा अभिरुचि, शत्रु पर विजय, सम्मानजनक एवं सफलताप्रद स्थिति रहेगी। विष्णुसहस्रनाम का पाठ अथवा सुन्दरकाण्डपाठ श्रेयस्कर होगा।

**तुला–** (र, रि, रु, रे, रो, त, ति, तु, ते)– शनि की साढेसाती चल रही है। अत: व्यय, अशान्ति, श्रमाधिक्य, झंझट, वैमनस्य एवं रोग शत्रु कोप संभावित है किंतु भाग्योदय, शिक्षा के क्षेत्र में सफलता, प्रसन्नता, सामाजिक प्रतिष्ठा, आर्थिक लाभ, उद्योग–व्यापार में मध्यम लाभ, राजनीति में सफलता, प्रभाववर्द्धक स्थिति, सन्तान–परिवार सम्बन्धी सुख एवं अभ्युन्नति संभावित है। चैत्र से राहु एवं केतु की उपासना लाभकर होगी। दुर्गापाठ करना श्रेयस्कर होगा।

**वृश्चिक–** (तो, न, नि, नु, ने, नो, य, यि, यु)– शनि की साढेसाती चल रही है। अत: श्रमाधिक्य, झंझट, वैमनस्य, शत्रुभय, वायुरक्त पीडा या दर्द, व्यय एवं चिंता संभावित है। उद्योग–व्यापार में घाटा या बाधा, शैक्षणिक एवं सन्तान सम्बन्धी अभ्युन्नति, पारिवारिक सुखबाधा तथा शत्रु से पराजय संभव है। अतएव मेषराशिवत् शनि की, राहु एवं गुरु की उपासना लाभकर होगी। दुर्गापाठ अथवा सुन्दरकाण्ड पाठ श्रेयस्कर होगा।

**धनु–** (ये, यो, भ, भि, भु, ध, फ, ढ, भे)– रक्तवायु पीडा से स्वास्थ्यबाधा, पारिवारिक सुख मध्यम, उद्योग–व्यापार में मध्यमत्वेन लाभ, तीर्थाटन–धर्मकृत्य में व्यय,शैक्षणिक क्षेत्र में बाधा एवं विलम्ब से सफलता, आर्थिक स्थिति सामान्यत: अनुकूल, प्रभाववर्द्धक स्थिति, सन्तान को मध्यमरूप से सफलता, कार्यसिद्धि एवं आर्थिक लाभ, प्रसन्नता एवं चिन्तन का अवसर प्राप्त होगा। गुरु, फाल्गुन तक राहु एवं चैत्र से केतु की उपासना लाभकर होगी।

**मकर–** (भो, ज, जि, जु, जे, जो, ख, खि, खु, खे, खो, ग, गि)– स्वास्थ्य अनुकूल, सन्तान सुख में बाधा, पारिवारिक सुख मध्यम, उद्योग–व्यापार में सामान्य लाभ, शिक्षा के क्षेत्र में सफलता, नवीन कार्यारंभ एवं राजनीति में लाभकर स्थिति, भ्रमण, तीर्थाटन, धर्मकृत्य सम्पादन तथा कार्यसिद्धि में सफलता मिलेगी। गुरु तथा फाल्गुन तक केतु की उपासना लाभकर होगी। सुन्दरकाण्डपाठ करना श्रेयस्कर होगा।

**कुंभ–** (गु, गे, गो, स, सि, सु, से, सो, द)– वायुरक्तविकार किन्तु स्वास्थ्य अनुकूल, सन्तान सुख मध्यमोत्तम, पारिवारिक सुख अनुकूल, शिक्षा के क्षेत्र में सफलता, उद्योग–व्यापार में सामान्य लाभ, भ्रमण, तीर्थाटन, कार्यसिद्धि में बाधा एवं विलम्ब किन्तु सफलता, प्रभाववर्द्धक स्थिति, राजनीति में लाभदायक स्थिति एवं सद्व्यय होगा। शनि की उपासना अथवा सुन्दरकाण्डपाठ करना श्रेयस्कर होगा।

**मीन–** (दि, दु, थ, झ, ञ, दे, दो, च, चि)– स्वास्थ्य अनुकूल, परिवारसुख, सन्तानसुख, प्रभावोत्पादक स्थिति, उद्योग–व्यापार में लाभ, राजनीति में सफलता, नवीन कार्यारंभ में सफलता एवं लाभकारक स्थिति, शिक्षा के क्षेत्र में अभ्युन्नति, सामाजिक यश, रोग शत्रु पर विजय, लाभकारक समय, धर्मकृत्य एवं तीर्थाटन का योग है। दुर्गापाठ अथवा सुन्दरकाण्ड पाठ श्रेयस्कर होगा।

## ✱ अथ ग्रहाणां तान्त्रिकमन्त्राः ✱

सूर्यस्य–ओम् घृणि: सूर्य आदित्य॥ चन्द्रस्य-ओम् सों सोमाय नमः। कुजस्य-ओं अं अंगारकाय नमः। बुधस्य-ओम् बुं बुधाय नमः॥ गुरोः-ओम् वृं वृहस्पतये नमः॥ शुक्रस्य-ओम् शुं शुक्राय नमः। शनेः-ओम् शं शनैश्चराय नमः। राहोः-ओं रां राहवे नमः। केतोः-ओम् कें केतवे नमः॥

**ग्रहाणां समिधः**–अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः। औदुम्बरः शमी दुर्वा कुशाश्च समिधः क्रमात्।

**शाकल्यनिर्माणम्**–तिलार्द्धं तण्डुलाः प्रोक्ताः तण्डुलार्द्धं यवाः स्मृताः। यवार्द्धं शर्करा प्रोक्ता सर्वार्द्धन्तु घृतं स्मृतम्।

**छन्दोगप्राण-प्रतिष्ठामन्त्रः**–ओम् वाङ्मनः प्राणापानौ व्यानश्चक्षुः श्रोत्रं शर्म्मवर्म भूतिः प्रतिष्ठा॥ वाजसनेयिनां **देवताप्राण-प्रतिष्ठामन्त्रः**–ओम् मनोजूतिर्जुषता-माज्यस्य वृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञवं समिमं दधातु। विश्वेदेवा स इह मादयन्तामोम् प्रतिष्ठ।

**अथ शुभदिनानि**–चन्द्रबुधगुरुशुक्रदिनानि। **शुभतिथयः**–२. ३. ५. ७. १०. ११. १२. १३. १५.।

**शुभनक्षत्राणि**–अश्वि. रो. मृ. पुन. पुष्य. ह. चि. स्वा. अनु. श्र. रे.। **शुभलग्नानि राशयश्च**–वृष. मिथुन. कर्क. कन्या. तुला. धनु. मीन।

### ग्रहकृतारिष्टशमनाय सौषधजलस्नानम्

लज्जावती, कुष्ठः (कुढ़), बला (बरियार), प्रियंगु (काउनी) घनः (मोथा) सर्षपः हरिद्रा देवदारु, पुंखा (सहरफोंका) लोध्रं एतैरौषधैर्युतजले पुष्पाक्षतदूर्वाश्रीखण्ड-रक्तचन्दन-धान्य-शतावरी-तीर्थोदक-सप्तमृत्तिका-तिल-यव-पञ्चगव्य-ताम्बूल-पञ्चपल्लव- पञ्चरत्नादीनि प्रक्षिप्य तैर्जलैः स्नायात्। एवं कृते दुष्टग्रहसूचितारिष्टनाश इष्टसिद्धिश्च।

### अर्द्धप्रहराबोधकचक्रम्

| दिन | सू. | चं. | मं. | बु. | वृ. | शु. | श. |
|---|---|---|---|---|---|---|---|
| दिने | ४।५ | २।७ | २।६ | ३।५ | ७।८ | ३।४ | १।६।८ |
| रात्रौ | ४।६ | ४।७ | ०।२ | ५।७ | ५।८ | ०।३ | १।६।८ |

### ग्रहाणामरिष्टहरत्वम्

राहुदोषं बुधो हन्यादुभयोस्तु शनैश्चरः। त्रयाणां भूमिजो हन्ति चतुर्णां दानवार्चितः। षण्णां देवमन्त्री च षण्णां दोषन्तु चन्द्रमाः। सप्तदोषं रविर्हन्ति विशेषादुत्तरायणे। शुक्रो दशसहस्राणि बुधो दशशतानि च। लक्षमेकं तु दोषाणां गुरुर्लग्ने व्यपोहति।

### योगिनीवासो युद्धयात्रायाम्

तत्र वामपृष्ठगता योगिनी शुभा, दक्षिणसम्मुखगा चाशुभा

| तिथयः | १।९ | ३।११ | ५।१३ | ४।१२ | ६।१४ | ७।१५ | २।१० | ८।३० |
|---|---|---|---|---|---|---|---|---|
| दिशा | पू० | अ० | द० | नै० | प० | वा० | उ० | ई० |

### गर्भाधानमुहूर्त्तः

रो. मृ. उत्तरा ३ ह. स्वा. अनु. श्र. ध. श. चि. पुन. पु. अश्वि. नक्षत्रेषु. १।२।३।५।७।१०।११।१२।१३ तिथिषु। चं. बु. वृ. शु. वारेषु। रात्रौ, रजोदर्शनानन्तरं चतुर्थरात्रितः १२ रात्रि यावत्। शुभैः केन्द्रत्रिकोणगैः पापैस्त्र्यायारिगैः पुंग्रहदृष्टलग्न, चन्द्रे विषमांशगे युग्मराशौ शुभम्।

### सीमन्तपुंसवनमुहूर्त्तः

पुंसवनं गर्भतस्तृतीये मासि कार्यम्। सीमन्तोन्नयनं च षष्ठेऽष्टमे वा मासि मासाधिपतौ सबले कार्यम्। मृ. पुष्य. श्रव. मू. पुन. ह. रो. रे. उत्तरा ३ (जन्मर्भविना) नक्षत्रेषु १।२।३।५।७।१०।११।१३ तिथिषु, शुक्लपक्षे, कृष्ण ५ यावत्। सू. मं. वृ. वारेषु, मतान्तरेण शु. च. अपि. पूर्वाह्णे, पुंभस्यांगे तदंशे शुभम्। तत्र पापैः ३।६।११ स्थितैः, शुभैः १।४।५।७।९।१० स्थितैः, चन्द्रे २।३।४।५।९।१०।११ स्थिते, ४।८।१० पापरहितैः शुभम्।

### जातकर्ममुहूर्त्तः

जातकस्य ग्रहदोषनाशाय आयुःश्रीवृद्धये च जन्मकाल एव जातकर्म पिता कुर्यात्। तदतिक्रमे एकादशे द्वादशेऽह्नि, चि. अनु. रे. उत्तरा ३ रो. अश्वि पुन. पु. स्वा.. श्र. ध. श. भेषु, पूर्णिमां विहाय शुभतिथिदिनलग्नेषु शुभम्।

### शिशोर्दुग्धपानमुहूर्त्तः

अश्वि. रो. मृ. ह. पुन. उत्तरा ३ पुष्य चि. अनु. श्र. ध. श. रे. नक्षत्रेषु शुभतिथिषु शुभदिनेषु वृष-सिंह-वृश्चिक कुम्भलग्नेषु स्तनपानं शुभं शिशोः। अन्नप्राशनोक्त-दिनतिथिनक्षत्रेषु सूतिकापथ्यं शुभम्। भैषज्योक्तनक्षत्रेषु औषधिभक्षणञ्च शुभं वेद्यम्।

### सूतिकास्नानमुहूर्त्तः

अश्वि. रो. मृ. स्वा. अनु. उत्तरा ३. रे. नक्षत्रेषु रवि, मङ्गल, वृहस्पति वारेषु शुभलग्नेषु शुभदृग्युतेषु १।२।३।५।७।१०।११।१३।१५ तिथिषु सूतिकास्नानं शुभम्। आश्ले, पूर्वा ३, ज्ये. ध. श. नक्षत्रेषु मध्यमम्।

### प्रसूतिनखच्छेदनमुहूर्त्तः

अश्वि. रो. मृ. पुन. पु. उत्तरा ३ ह. चि. स्वा. वि. अ. ज्ये. श्र. ध. श. नक्षत्रेषु, ३।५।७।१०।११।१३ तिथिषु, ३।५।६।७।८।११ लग्नेषु शुभदिनेषु पूर्वाह्णे शुभम्।

### स्त्रीणां लाक्षाभरणधारणमुहूर्त्तः

भ. आ. श्ले. म. वि. श. रहितनक्षत्रेषु शनिमंगलरहितदिनेषु शुभतिथौ स्त्रीणां लाक्षाभरणधारणं (लहठीधारणं) शुभम्।

### शिशुनिष्क्रमणमुहूर्त्तः

जन्मतश्चतुर्थे मासि यात्रोक्तदिनतिथिनक्षत्रेषु द्वादशे दिवसे वा शुभं स्यात्।

### शिशोर्भूम्युपवेशनमुहूर्त्तः

आदौ पृथ्वीं वराहञ्च सम्पूज्य कुजवले पञ्चमे मासि उत्तरा ३ रो. मृ. ज्ये. अनु. अश्वि. ह. पुष्य अभि नक्षत्रेषु रिक्तामारहिततिथिषु शुभदिनेषु वृष, सिंह, वृश्चिक, कुम्भलग्नेषु शिशोः कटिप्रदेशे कटिसूत्रं बद्ध्वा पृथिव्यामुपवेशयेत्। तन्मन्त्रः–रक्षैनं वसुधे देवि सदा सर्वगतं शुभम्। आयुः प्रमाणं सकलं निक्षिपस्व हरिप्रिये। अत्रैव शिशोरग्रे वस्त्रं, शस्त्रं, लेखिनीं, पुस्तकं, सुवर्णं, रौप्यं च स[illegible]म्। तेषु बालो यं गृह्णाति तैस्तस्य वृत्तिः ज्ञातव्येति।

### शिशुविलोकनमुहूर्त्तः

तृतीयं मासि शुभतिथिदिननक्षत्रेषु पुष्पफलवस्त्रद्रव्यादिना शिशुदर्शनं शुभम्।

### नामकरणमुहूर्त्तः

विप्राणां ११ क्षत्रियाणां १३ वैश्यानां १६ शूद्राणां ३१ तमे दिने नामकरणं शुभम्। अथवा स्वा. पुन. श्र. ध. ह. अश्वि. पुष्य, अभि. उत्तरा ३, रो. मृ. रे. चि. अनु. नक्षत्रेषु, १।२।३।५।७।१०।११।१२।१३ तिथिषु, चं. बु. वृ. शु. दिनेषु, पूर्वाह्णे शुभम्, मध्याह्ने मध्यमम्। शुभलग्ने, शुभैः १।४।५।७।९।१० स्थितैः, पापैः ३।६।११ स्थैः, ८।१२ गृहे शुद्धे, चन्द्रे २।३।५।९।१० स्थिते। लग्ने शुभांशे पितृपुत्रयोश्चन्द्रतारानुकूले उत्तरायणे शुद्धसमये शुभं नामकरणम्।

### अन्नप्राशनमुहूर्त्तः

कन्यकानां पञ्चममासतो विषममासेषु बालकानां षष्ठात्सममासेषु रो. उत्तरा ३ मृ. रे. चि. अनु. स्वा. पुन. श्र. ध. श. ह. अश्वि. पुष्य. अभि. नक्षत्रेषु २।३।५।७।१०।१३।१५ तिथिषु, च. बु. वृ. शु. दिनेषु, शुक्लपक्षे, पूर्वाह्णे २।३।४।५।६।७।९।१०।११ लग्नेषु, एषु जन्मलग्नराश्योरष्टमलग्नमंशं च त्यजेत्। शुभैः १।४।५।७।९।१० स्थितैः, पापैः ३।६।११ गतैः, दशमस्थाने ग्रहरहिते, शुभदृग्युतलग्ने, ४।८।६।१२ रहिते चन्द्रे अन्नप्राशनं शुभम्।

### कर्णवेधमुहूर्त्तः

१।२।३।५।६।७।१०।११।१२।१३।१५ तिथिषु, शुक्लपक्षे, कृष्णे ५ यावत् च. बु. वृ. शु. दिनेषु जन्मतारां विहाय श्र. ध. पुन. ह. अश्वि. पुष्य, अभि. मृ. रे. चि. अनु. नक्षत्रेषु १२।६ मासे वा विषम वर्षे चैत्रपौषहरिशयनरिक्तासमवर्षाणि त्यक्त्वा २।३।४।६।७।९।१२ लग्नेषु. शुभैः १।४।५।७।९।१० गतैः, पापै ३।६।११ गतैः, लग्नस्थे गुरौ शुद्धसमये शुभः।

### चूड़ाकरण ( मुण्डनाद्यकचकर्त्तन ) मुहूर्त्तः

चैत्ररहितमाघादि ६ मासे, ज्येष्ठाग्रहणयोः ज्येष्ठसन्तानं विना, विषमवर्षे, अश्वि. मृ. पुन. पुष्य ह. चि. स्वा. ज्ये. अभि. श्र. ध. श. रे. नक्षत्रेषु च. बु. वृ. शु. वारेषु २।३।५।७।१०।११।१३ तिथिषु शुक्लपक्षे कृष्णे ५ यावत्, २।३।४।७।९।१२ एतद्राशेर्लग्नांशे शुक्रवर्जिताष्टमशुद्धे, पापैः ३।६।११ गतैः, शुभैः १।४।५।७।९।१० गतैः, जन्मराशिलग्नयोरष्टमेतरलग्ने ४।६।८।१२ रहितचन्द्रे शुभम्।

### अक्षरारम्भमुहूर्त्तः

उत्तरायणे पञ्चमवर्षे (बालो यदि क्षमस्तदा तत्पूर्वमपि) गणेशविष्णुसरस्वतीलक्ष्मीकुलदेव-ग्रामदेवान् विधिवत्सम्पूज्य प्रथमाक्षरारम्भो विधेयः। अश्वि. आर्द्रा पुन. पुष्य ह. चि. स्वा. अनु. अभि. श्र. रे. नक्षत्रेषु, २।३।५।६।१०।११।१२ तिथिषु शुक्लपक्षे, कृष्णे ५ यावत्। च. बु. वृ. शु. दिनेषु, वृष मिथुन कन्या धनु मीन लग्नेषु तत्रवांशे चोत्तमः, कुम्भांशकं विनाऽष्टमशुद्धे, खेऽस्ते गुरुबुधे, शुक्रे लग्ने ग्रहवलाढ्ये शुभः।

## विद्यारंभमुहूर्त्तः

उत्तरायणे गणेशं विष्णुं लक्ष्मीं सरस्वतीञ्च सम्पूज्य अक्षरग्रहणे दृढे सञ्जाते विद्यारम्भः कार्यः सूर्यबुधगुरुशुक्रवारेषु, २।३।५।६।१०।११।१२ तिथिषु, अश्वि. मृ. आर्द्रा, पुन. पुष्य, आश्ले. ह. चि. स्वा. मूल, पूर्वा.३ श्र. ध. श. नक्षत्रेषु, शुक्लपक्षे, कृष्णे ५ यावत्, लग्नाष्टमशुद्धे, शुभैः १।४।५।७।९।१० गृहगतैः, पापैः ३।६।११ गतैः, वृषमिथुनकन्याधनुर्मीनान्यतमलग्ने तदंशे वा विद्यारंभः शुभावहः।

## उपनयन (व्रतबन्ध) मुहूर्त्तः

शुद्धसमये, उत्तरायणे, माघादिषण्मासेषु, सू.च.बु.वृ.शु. वारेषु (सामवेदिनां मंगलवारेऽपि), जन्ममासनक्षत्रादौ व्रतं शुभम्। २।३।५।१०।११।१२ तिथिषु शुक्लपक्षे, पूर्वाह्णे च शुभम्। मकरार्के पौषे ११।१२, मकरार्के माघे १२, चैत्रे वैशाखे च तृतीया, वैशाखभिन्नमासानां द्वितीया, आषाढ़े १०।११ चोपनयने निषिद्धाः। अश्वि. रो. मृ. आ. पुष्य आश्ले. पूर्वा ३, उत्तरा ३, ह. चि. स्वा. अनु. मू. श्र. ध. श. रे नक्षत्रेषु (क्षत्रियवैश्ययोः पुनर्वसावपि) शुभम्। ब्राह्मणानां पुनर्वसुनक्षत्रे उपनयनं निषिद्धम्। मन्वादियुगादिषु, अपराह्णे, सायं, प्रदोषेऽनध्याये, कृष्णपक्षे चोपनयनं निषिद्धम्। त्रिषडस्थाः खलाः सर्वे चन्द्रो द्विद्यूनदिक्त्रिगः। सौम्याः केन्द्रत्रिकोणस्थाः लाभे सर्वे व्रते शुभाः। लग्नेशचन्द्रशुक्रगुरवश्च षडष्टगाः न शुभाः। चन्द्रशुक्रौ लग्नात् १२ गतौ न शुभौ १।५।८ स्थाः पापाः न शुभाः। ६।८।१२ गताः शुभाः न शुभप्रदाः। ३।६।११ गताः पापाः शुभदाः, पूर्णचन्द्रो वृषकर्कलग्नगतो शुभो नान्यथा। लग्नेऽर्कः शुभः। **गुरुशुद्धिः**—जन्मराशितः उपनयनकाले २।५।७।९।११ स्थानगतः गुरुः शुभः, ४।१०।१२स्थानगतः शान्त्या शुभः, १।३।६।८ स्थानगतो निषिद्धः। रामाचार्यमतेन १।३।६।१० स्थानगतो गुरुः शान्त्या शुभः, ४।८।१२ स्थनगतो निषिद्धः। ब्राह्मणानां पञ्चवर्षतः षोडशवर्षपर्यन्तं, क्षत्रियाणां षड्वर्षादारभ्य द्वाविंशतिवर्षपर्यन्तं, वैश्यानामष्टवर्षादारभ्य चतुर्विंशतिवर्षपर्यन्तमुपनयनकालः। तत्रोपनयनारम्भकालात्सर्वेषां यथोत्तरं गौणकालोऽतः समये प्राप्ते सति यथापूर्वमुपनयनं कार्यम्।

**प्रदोषनिर्णयः**— यदा तृतीयायां प्रहररात्र्यभ्यन्तरे चतुर्थी, द्वादश्यां यदा मध्यरात्र्यभ्यन्तरे त्रयोदशी, षष्ठ्यां यदा सार्द्धप्रहररात्र्यभ्यन्तरे सप्तमी तिथिर्भवेत्तदा प्रदोषं ऽवगन्तव्यस्तत्रोपनयनं निषिद्धम्।

## विवाहमुहूर्त्तः

मार्गमाघफाल्गुनवैशाखज्येष्ठाषाढ़मासेषु सौरक्रमेण (आषाढ़े हरिशयनात्प्रागेव) १।२।३।५।६।७।८।१०। ११।१२।१३।१५ तिथिषु, सू.चं.बु.वृ.शु.वारेषु,अश्वि.रो.मृ.म.उत्तरा३,ह.चि.स्वा.अनु.मू.श्र.ध.रे. नक्षत्रेषु पंचशलाकावेधरहितेषु, वृष, मिथुन, कन्या, तुला,धनु,मीन,लग्नेषु,शुभग्रहेषु १।४।५।७।९।१० स्थितेषु, पापेषु ३।६।११ गतेषु शुभः। विवाहे यदि गुर्वा शुक्रो १।४।५।७।९।१० गतो भवेत्तदा सकलंदोषं नाशयति। ज्येष्ठ कन्या, ज्येष्ठो वरः ज्येष्ठमासश्च त्रिज्येष्ठसंज्ञकस्तत्र विवाहो न कार्यः। ज्येष्ठकन्यावरयोः ज्येष्ठमासे विवाहो निषिद्धः। ज्येष्ठद्वयं मध्यमं स्यात् । आवश्यके कृत्तिकास्थं सूर्यं त्यक्त्वा ज्येष्ठमासेऽपि ज्येष्ठवरकन्ययोर्विवाहः शुभः।

**वरवरणमुहूर्त्तः**— शुभतिथिदिनलग्नेषु कृत्तिकापूर्वात्रयविवाहोक्तभेषु पुष्पफलवस्त्रादिभिः वरवरणं शुभम्।

**कन्यावरणमुहूर्त्तः**— शुभतिथिदिनलग्नेषु कृत्तिकापूर्वात्रयविवाहभेषु च पुष्पफलवस्त्रादिभिः कन्यावरणं शुभम्।

**विवाहोपनयनादौ मण्डपादिनिर्माणमुहूर्त्तः**— चन्द्रतारानुकूले दिने विवाहमुहूर्त्ते वैवाहिककार्यमुपनयनादिमुहूर्त्ते चोपनयनादिकं सर्वं कार्यं विधेयम्।

**महामृत्युंजयमन्त्रस्य जपविधिः**— श्रीगणेशस्मरणपूर्वकं शान्तिपाठं कृत्वा कुशत्रयतिलजलान्यादाय संकल्पः— ॐ अद्य अमुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्यास्य श्री अमुकशर्म्मणः उपस्थितशरीराविरोधेनाखिलारिष्टझटितिप्रशमनपूर्वक—दीर्घायुष्ट्वबलपुष्टिनैरुज्यप्राप्तिकामः अद्यारभ्य यथाकालं यजुर्वेदान्तर्गतमाध्यन्दिनशाखीय ॐ हौं ॐ जूं सः ॐ भूर्भुवः स्वः त्रयम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् भूर्भुवः स्वरों जूं सः हौं ॐ'' इति महामृत्युंजयमन्त्रस्य एतत्सहस्रसंख्यकजपमहं करिष्यामि। ॐ हौं ॐ जूं सः (समस्तमन्त्रः) अस्य श्री महामृत्युञ्जयमन्त्रस्य वामदेवकहोलवशिष्ठाऋषयः, पंक्तिर्गायत्र्यनुष्टुप्छन्दांसि सदाशिवमहामृत्युञ्जयरुद्रदेवता हौ बीजं जूं शक्तिः सः कीलकं महामृत्युञ्जयप्रीतये ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। ऋष्यादिन्यासः— वामदेवकहोलवशिष्ठऋषिभ्यो नमः शिरसि। पंक्तिर्गायत्र्य—नुष्टुप्छन्दोभ्योनमः मुखे। सदाशिवमहामृत्युञ्जयरुद्रदेवताभ्यो नमः हृदि। हौं बीजाय नमः नाभौ। जूं शक्तये नमःपादयोः। सः कीलकाय नमः सर्वाङ्गे। ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयायनमः। ॐ हौं ॐ जूं सःभूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अष्टमूर्त्तये मां जीवय शिरसि स्वाहा। ॐ हौं ॐ जूं सः भूर्भुवः स्वः सुगन्धिं पुष्टिवर्धनं ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा शिखायै वषट्। ॐ हौं ॐ जूं सः भूर्भुवः स्वःउर्व्वारुकमिव बन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ॐ ह्रीं हौं कवचाय हुम्। ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममन्त्रयाय नेत्रत्रयाय वौषट्। ॐ हौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय उज्ज्वलज्ज्वालाय मां रक्ष रक्ष अघोराय अस्त्राय फट्। इति षडंगन्यासः। ततः— चन्द्रोद्भासितमूर्द्धजं सुरपतिं पीयूषपात्रं बहद्धस्ताब्जेन दधत्सुदीप्तममलं हास्यास्यपंकेरुहम्। सूर्येन्द्वग्निविलोचनं करतले पाशाक्षसूत्रांकुशाम्भोजं विभ्रतमक्षयं सुरपतिं मृत्युञ्जयं संस्मरेत् इत्यनेन ध्यात्वा यथोपचारैः सम्पूज्य मन्त्रं जपेत्। जपसमाप्तौ च शाकल्यादिभि—र्दशांशक्रमेण होमतर्पणमार्जनब्राह्मणभोजनञ्च कारयेत्। **लघुमृत्युञ्जयमन्त्रः**— ॐ जूं सः।



## वधूप्रवेशमुहूर्त्तः

विवाहदिवसात्षोडशदिनमध्ये समदिने पञ्चम—सप्तम—नवमदिने च ततो मासमध्ये विषमदिने ततो वर्षाभ्यन्तरे विषममासे, चैत्रपौषभाद्र—क्षयमास—मलमासभिन्नसमये वधूप्रवेशः प्रशस्तः। नात्र शुक्रविचारः कालविचारो वा। १।२।३।५।६।७।८।१०।११।१२।१३।१५ तिथिषु, चं. वृ. शु. श. वारेषु, मन्तान्तरेण बुधेऽप्यावश्यके। अश्वि. रो. मृ. पुष्य, उत्तरा ३, ह. चि. स्वा. मू. श्र. ध. रे. अनु. नक्षत्रेषु। २।३।५।६। ७।८।९।११।१२ लग्नेषु। शुभैः १।२।५।७।१०।११ स्थितैः। पापैः ३।६।११ स्थितैः। चतुर्थाष्टमशुद्धे शुभः।

## नववध्वाः पाकारम्भमुहूर्त्तः

रो. मृ. उत्तरा ३, पुष्य, कृ. वि. ज्ये. श्र. ध. श. रे. नक्षत्रेषु, बु. वृ. श. वारेषु, शुभतिथिषु, शुक्लपक्षे। कृष्णे ५ यावत्, २।५।८।११ लग्नेषु। लग्नात् चतुर्थाष्टमगृहे शुद्धे, शुभे बलान्विते सप्तमस्थे शुभः।

## द्विरागमनमुहुर्त्तः

अश्वि. रो. मृ. पुन. पुष्य, उत्तरा ३, ह. चि. स्वा. अनु. मू. श्र. ध. श. रे. नक्षत्रेषु, १।२।३।५।६।७।८।१०।११।१२।१३।१५ तिथिषु, शुक्लपक्षे, कृष्णे ५ यावत्। सू. चं. बु. वृ. शु. वारेषु मृत्युयोगादिरहितेषु, २।३।६।७।१२ लग्नेषु शुभयुतेक्षितेषु। शुक्रे १।४।७।१० गते,जीवे ३।६।१०।११गते। पापैः ३।६।११ स्थितैः शुभम्। विषमवर्षे सौरक्रमेणाग्रहणफाल्गुनवैशाखमासेषु शुक्रबाल्यास्तवृद्धत्वभिन्नकाले वामपृष्ठगते शुक्रे, शुक्रोदिते द्विरागमनं शुभम्। प्रथमवर्षे न शुक्रविचारः कार्यः। तृतीयादिविषमवर्षे शुक्रविचारो विधेयः। शुक्रान्धविहित (रे, अश्वि. रो. मृ.) नक्षत्रेषु सम्मुखदक्षिणशुक्रेऽपि द्विरागमनं शुभम्। व्यतीते पञ्चमे वर्षे न शुक्रविचारो न वा मुहूर्त्तविचारः। तदानीं यस्मिन् कस्मिन्नपि शुभतिथिदिननक्षत्रयुक्तकाले द्विरागमनं शुभम्।

## वापीकूपतडागादिखननमुहूर्त्तः

विचैत्रोत्तरायणे शुक्लपक्षे शुद्धसमये, रो. मृ. पुष्य. म. उत्तरा ३, ह. अनु. पूषा. ध. श. रे. नक्षत्रेषु, पृथ्वीशयननक्षत्ररहितेषु,शुभतिथिदिनेषु ४।१०।११।१२ लग्नेषु राशिषु च। शुक्रे दशमस्थे। गुरुबुधयोरन्यतरस्थलग्ने, पापैः निर्बलैः, शुभैः सुबलिभिः शुभम्।

## जलाशयवाटिकादेवादिप्रतिष्ठामुहूर्त्तः

चैत्ररहितउत्तरायणे शुद्धसमये शुक्लपक्षे सू. चं. बु. वृ. शु. वारेषु, १।२।३।५।६।७।८।१०।११।१२।१३।१५तिथिषु। मृ. रे. चि. अनु. ह. अश्वि. पुष्य, स्वा. पुन. श्र. ध. श. रो. उत्तरा ३ नक्षत्रेषु। अथवा प्रतिष्ठाप्यदेवताकतिथि—दिननक्षत्रेषु देवादिप्रतिष्ठा शुभा। सिंहे सूर्यं, कुम्भे ब्रह्माणं, मिथुने शङ्करं स्थापयेत्। द्विस्वभावे देव्यः, चरलग्ने च योगिन्यः स्थापनीयाः। सर्वे स्थिरलग्नेषु स्थाप्याः। चन्द्रपापैः ३।६।११ स्थितैः। शुभैः १।२।८ भिन्नस्थानगतैः देवादिप्रतिष्ठा शुभा। ग्रहाः पुष्ये, बुद्धः श्रवणायां, गणेशाद्यो रेवत्यां स्थाप्याः। भगवतो देवोत्थानैकादश्यां रामनवम्यां, कृष्णाष्टम्यां, देव्याः नवरात्रौ दीपमालिकायां, शङ्करस्य शिवरात्रौ वा शुभं प्रतिष्ठापनम्।

### कूपचक्रंरोहिणीभात्

| स्थान | न | फलानि |
|---|---|---|
| मध्य | ३ | सांग्रस्वादु |
| पूर्व | ३ | निर्जलम् |
| अग्नि | ३ | शांघ्रजलम् |
| दक्षिण | ३ | निर्जलम् |
| नेऋत्य | ३ | निर्मलजलम् |
| पश्चिम | ३ | शीतलजलम् |
| वायु | ३ | जलहानि: |
| उत्तर | ३ | मधुरजलम् |
| ईशान | ३ | क्षारजलम् |

अथवा सूर्यक्षांदप्येवमंव गणनीयम्

### सूर्यभात्तडागचक्रम्

| स्थान | न | फलानि |
|---|---|---|
| पूर्व | २ | जलशोष: |
| अग्नि | ३ | बहुजलम् |
| दक्षिण | २ | जलहानि: |
| नैऋत्य | २ | अमृतजलम् |
| पश्चिम | ३ | स्वादुजलम् |
| वायु | २ | निर्जलम् |
| उत्तर | ३ | स्थिरजलम् |
| ईशान | ३ | नष्टजलम् |
| मध्य | ५ | पूर्णजलम् |
| वाह्य | ३ | अमृतजलम् |

### रोहिणी-नक्षत्राद्वापी चक्रम्

| स्थान | न | फलानि |
|---|---|---|
| पृष्ठे | ४ | शुभजलम् |
| नाभौ | ४ | बुद्धिनाश: |
| हृदि | ४ | स्थिरता |
| मध्य | ४ | कलह: |
| नेत्रयो: | ४ | धनागम: |
| पादयो: | ८ | दुखम् |

### हवनचक्रं सूर्यभात्

| न | ग्रह | फलानि |
|---|---|---|
| ३ | सू. | अशुभ |
| ३ | बु. | शुभ |
| ३ | शु. | शुभ |
| ३ | श. | अशुभ |
| ३ | च. | शुभ |
| ३ | म. | अशुभ |
| ३ | बृ. | शुभ |
| ३ | रा. | अशुभ |
| ३ | के | अशुभ |

### बीजवपने फणिचक्रं राहुनक्षत्रात

| नक्षत्र | ८ | ३ | १ | ३ | १ | ३ | १ | ३ | ४ |
|---|---|---|---|---|---|---|---|---|---|
| फलं | अशुभ | शुभम् | अशुभं | शुभम् | अशुभं | शुभम् | अशुभ | शुभम् | अशुभं |

### हलचक्रमर्कभुक्तभात

| नक्षत्र | ३ | ८ | ९ | ८ |
|---|---|---|---|---|
| फलं | अशुभं | शुभम् | अशुभं | शुभम् |

च. बु. वृ. शु. श. वारेषु ॥ दिवा ॥ शुद्धसमये ॥ शुद्धे वृषवास्तुचक्रे, पृथ्वीशयननक्षत्ररहितनक्षत्रेषु । २।३।५।६।७।८।९।११।१२ लग्नेषु । लग्ने शुभदृग्युते । शुभै: १।४।५।७।९।१० स्थितै:, पापै: ३।६।११ स्थितै:, ८।१२ ग्रहरहिते शुभ: । तृणकाष्ठादिगृहनिर्माणमशुद्धेऽपि परञ्च इष्टिकादिगृहनिर्माणं शुद्धसमये एव । देवालयमठादिनिर्माणमप्येष्वेव मुहूर्तेषु शुभम् ।

### देवालयगृहारम्भजलाशयारम्भे खातदिग्ज्ञानम्

| खातदिक् | नैऋत्यां | आग्नेय्याम् | ऐशान्यां | वायव्यां |
|---|---|---|---|---|
| देवालयारम्भे | ध.म.कु. सूर्ये | मी.मे.वृ. सूर्ये | मि.क.सि. सूर्ये | क.तु.वृ. सूर्ये |
| जलाशयारम्भे | तु.वृ.ध. सूर्ये | म.कु.मी. सूर्ये | मे.वृ.मि. सूर्ये | क.सि.कं. सूर्ये |
| गृहारम्भे | वृ.मि.क. सूर्ये | सिं.क.तु. सूर्ये | वृ.ध.म. सूर्ये | कु.मी.मे. सूर्ये |

### अथ तिथिनन्दादिसंज्ञा

| संज्ञा | नन्दा | भद्रा | जया | रिक्ता | पूर्णा | सिनीवाली | कुहू: |
|---|---|---|---|---|---|---|---|
| तिथय: | १।६।११ | २।७।१२ | ३।८।१३ | ४।९।१४ | ५।१०।१५ | दृष्टचन्द्रमा | नष्टचन्द्रमा |

### गृहप्रवेशे कुम्भचक्रमर्कभात्

| स्थान | न० | फलानि |
|---|---|---|
| मु. | १ | अग्निदाह: |
| पू. | ४ | उद्वसनम् |
| द. | ४ | लाभ: |
| प. | ४ | धनम् |
| उ. | ४ | कलह: |
| म. | ४ | विनाश: |
| अ. | ३ | स्थिरता |
| कं. | ३ | स्थिरता |

### गृहारम्भे वृषचक्रमर्कभात्

| स्थान | न० | फलानि |
|---|---|---|
| शीर्षे | ३ | अग्निभयम् |
| अ. पा. | ४ | शून्यम् |
| पृ. पा. | ४ | स्थैर्यम् |
| पृष्ठे | ३ | धनम् |
| द. कु. | ४ | लाभ: |
| पु. | ३ | नाश: |
| वा. कु. | ३ | धननाश: |
| मुखे | ३ | कष्टम् |

### गृहारम्भ ( वास्तु ) मुहूर्त्त:

वैशाख, आषाढ ( चतुर्गृहं त्यक्त्वा ) कार्तिक, अग्रहण, फाल्गुन, श्रावण ( सौरक्रमेण ) मासेषु । सम्मुखकालवर्जितसमये । २।३।५।७।१०।११ ।१२।१३।१५ तिथिषु । शुक्लपक्षे । कृष्णे ५ यावत् । अश्वि. रो. मृ. पुन. पुष्य. उत्तरा ३, ह. चि. स्वा. अनु. मू. श्र. ध. श. रे नक्षत्रेषु ।

### गृहप्रवेशमुहूर्त्त:

वैशाख, आषाढ, कार्तिक, अग्रहण, फाल्गुन, श्रावण ( सौर ) मासेषु २।३।५।७।१०।११। १२।१३।१५ तिथिषु, शुक्लपक्षे, कृष्णे ५ यावत् । अश्वि. रो. मृ. पुन. पुष्य. उत्तरा ३ ह. चि. स्वा. अनु. मू. श्र. ध. श. रे. नक्षत्रेषु । चं. बु. वृ. शु. श. वारेषु । दिवारात्री, शुद्ध समये । शुद्धे कुम्भचक्रे । २।५।८।११ लग्नेषूत्तम: । ३।६।९।१२ मध्यम: ॥

जन्मराशिलग्नाभ्यामुपचय(३।६।१०।११) राश्यंशयो:, स्थिरराशौ, लग्नात् १।३।५।७।९।।नेषु शुभा:, ३।६।११ स्थानेषु पापा:, ४।८ भवने ग्रहमुख-कालरहितसमये शुभ:।इष्टिकादिगृहप्रवेश: शुद्धसमयादिकगृहप्रवेशोऽशुद्ध-समयेऽपि । अग्निभये राजकोपप्रकोपे सति यस्मिन् कस्मिन् शुभमुहूर्त्ते गृहारंभो गृहकार्य: ।

★ **अथ चरणिविचार:**- रमाणेन दीर्घविस्तार-संयुतमष्टभिश्च हरेद् भागं शेषं च। पशुहानि: पशो रोग: पशुलाभ: पशुक्षय: । पशुनाश: पशुमंदो बहुपशु: ।

★ **पृथ्वीशयननक्षत्राणि** - सूर्य ५।७।९।१२।१९।२६ मिते चन्द्रनक्षत्रे पृथ्वीशयननक्षत्रेषुकूपवास्तुप्रभृतिकार्यं ट्यूबवेल बोरिंग प्रभृतिस्थापनञ्चम् ।

★ **ट्यूबवेल, बोरिंग, टंकी प्रभृशुभमुहूर्त्त:**-कृत्तिका आश्ले. मघा. पूर्वा ३. भरणी, विक्षत्रेषु २।४।५।६।७।९। १३।१५ तिथिषु । शुक्लपक्षे, कृष्णवत्, च. बु. वृ. शु. वारेषु।। पूर्वाह्णेऽपराह्णेवा. २।३।४।६।११।१२। लग्नेषु, लग्ने शुभयुग्दृष्टे, शुभै: १।४।५।७।९।१। पापै: ३।६।११ गतै: शुभम् ।

★ **मासस्नानमुहूर्त्त:**- विवाहादिनमध्ये तदभावे मासपर्यन्तं २।३।५।७।१०।११।१, च. बु. वृ. शु. दिनेषु, आर्द्रा, पुन. पुष्य, आश्ले, उफ. ह. चि. स्वा. नक्षत्रेषु, वृष मि. कन्या. तु. ल. ।

★ **चुल्हिकास्थापनमुहूर्त्त:** -. वि. रो, मृ, उत्तरा ३ कृ, मू. पूषा, ध, आर्द्रा नक्षत्रेषु । दिनेषु शुभतिथिलग्नेषु शुभम् ।

### चुल्हिकाचक्रम् भावधि

| स्थान | न० | फलम् | | न० | फलम् |
|---|---|---|---|---|---|
| पृष्ठे | ६ | धनम् | | ५ | नाश: |
| शीर्षे | ४ | मृत्युभयम् | | २ | भोग: |
| बाहौ | ८ | सुखम् | | २ | स्त्रीमृति: |

**मन्त्रग्रहणमुहूर्त्त:**– अश्वि. रो. पुन. पुष्य उत्तरा ३, ह. चि. स्वा. अनु मू. अभि. श्र. ध. श. रे. नक्षत्रेषु । २।३।५।७।१०।११।१२।१३।१५ तिथिषु । शुक्लपक्षे ॥ अत्यावश्यके कृष्णपक्षे ५ यावत्, सू, च, बु, वृ, शु, वारेषु । शुद्धसमये प्रात: मध्याह्नेवा । २।३।५।७।९।१२। लग्नेषु, शुभै: १।४।५।७।९।१० गतै:, पापै: ३।६।११ स्थितै:, वै. श्रा, आश्वि, का अग्र, मा, फा, मासेषु (सौरक्रमेण) । संक्रान्तौ पूर्णिमायां नवरात्रमध्ये, ग्रहणे, सिद्धिक्षेत्रे मन्वादि-युगादिषु च मुहूर्तं विनाऽपि मन्त्रग्रहणं शुभम् ।

**व्रतोद्यापनमुहूर्त्त:**- अश्वि, रो, मृ, पुन, पुष्य. उत्तरा ३, ह. चि., स्वा. अनु. मू. श्र. ध. श. रे. नक्षत्रेषु । शुद्धसमये क्रियमाणव्रततिथिषु दिवसे वा । का, मा, फा, वै, ज्ये, आषा, मासेषु । शुभलग्नेषु । कार्तिकव्रतोद्यापनं तुलस्याकाशदीप-दानव्रतोद्यापनं च शुद्धसमये वृश्चिकसंक्रान्तिपूर्वरात्रौ । एवमेव यस्य व्रतस्य मासविशेषेण सह सम्बन्धस्तत्तस्मिन्नेव मासे शुद्धसमये कार्यम् । शुभै: १।४।५।७।९।१०। स्थितै: पापै: ३।६।११ स्थितै:, पञ्चमेशे नवमेशे गुरौ च बलाढ्ये सति शुभमन्यथा ग्रहशुद्ध्यभावेऽपि परमावश्यके शुभम् ।

**यात्रामुहूर्त्त:**– वामपृष्ठराहौ । मलमासक्षयमास-सौरक्रमेण चैत्रभाद्रपौषरहित मासेषु । अश्वि मृ, पुन, पुष्य. ह, ज्ये, अनु, श्र, रे, नक्षत्रेषूत्तम: । रो, पूर्वा ३. चित्रा स्वा, मू, पूषा. ध. नक्षत्रेषु मध्यम: । मृत्युयोगदग्धतिथिमासान्त-संक्रान्तिमासादिप्रभृतिदोषरहिते । अमृतसिद्ध-सर्वार्थसिद्धादिशुभयोगेषु ॥ अमावास्यां विहायान्यतिथिषु योगवशनान्यथा शुभतिथिषु ॥ दिक्शूलरहितदिने ॥ २।४।६।८।९ तारासु । पञ्चमतारायाः प्रथमद्वितीयावृत्तेषु च । १।२।३।५।६।७।९।१०।११। चन्द्रेषु । आवश्यके ४।१२ चन्द्रेऽपि, द्विरागमनानन्तरं पितृगहागताया: पुन: पतिगृहगमने दक्षिणसम्मुखकालौ त्याज्यौ । तदनन्तरमावश्यके केवलं सम्मुखकालस्त्याज्य: । दक्षिणकाले च सम्मुखचन्द्रवशेन यात्रा कार्या ।

**राहु ( काल ) बास:**- सौरक्रमेणाग्रहणपौषमाघमासेषु पूर्वस्यां । फाल्गुन चैत्रवैशाखेषु दक्षिणस्याम् । ज्येष्ठाषाढश्रावणेषु पश्चिमायांम् । भाद्राश्विनकार्तिकेषूत्तरस्यां कालवास: ।

### सर्वदिग्गमननक्षत्राणि

अश्विनीमृगशिरापुष्यश्रवणानक्षत्राणि सर्वदिग्गमने शुभानि ।

### दिक्शूलविचारस्तत्परिहारश्च

सोमे, शनिवारे च पूर्वस्यां, वृहस्पतिवारे दक्षिणस्यां, रविवासरे शुक्रवासरे च पश्चिमायां, मंगलवासरे बुधवासरे चोत्तरस्यां दिशि दिक्शूलत्वाद् गमनं निषिद्धम् । परिहार:- रव्यादिवासरेषु क्रमेण घृतपयोगुडतिलदधियवमाषान्न भुक्त्वा शूलदोषोपशान्तये गच्छेत् ।

### विदिक्शूलविचार:

शनौ पूर्वे, चन्द्रेऽग्निकोणे, गुरौ याम्यां,बुधे नैर्ऋत्यां, सूर्ये प्रतीच्यां, शुक्रे वायुकोणे, उत्तरस्यां मंगले बुधे, ऐशान्यां बुधमन्दयोर्न गन्तव्यम् ।

### लग्नचन्द्रयोर्वास:

मेषसिंहधनुराशिषु पूर्वस्यां, वृषकन्यामकरराशिषु दक्षिणस्यां मिथुनतुलाकुम्भराशिषु पश्चिमायां, कर्कवृश्चिकमीनराशिषु चोत्तरस्यां लग्नचन्द्रयोर्वास: । सम्मुखदक्षिणस्थलग्नचन्द्रयो: यात्रा शुभा । परं सर्वदिग्गमननक्षत्रेषु वामपृष्ठचन्द्रेऽपि यात्रा शुभेति ।

### चन्द्रविचार:

जन्मनामग्रामादिराशितोऽभीष्टदिनस्य चन्द्रं यावद्गणनीयम् । तत्र १।२।३।५।६ ।७।९।१०।११ संख्याकरचन्द्र: शुभप्रद: । ८ चन्द्र: मृत्युप्रद: । ४ कलहद: ।१२। हानिकारक: । तत्र दुष्टे चन्द्रे तद्दोषशान्त्यर्थमामतण्डुलशंखदधिश्वेत-वस्त्रादिदानं कार्यम् ।

### द्वादशचन्द्रस्य विशेष:

आधाने सम्प्रदाने च विवादे राजविग्रहे । पाणिग्रहे प्रयाणे च चन्द्रो द्वादशग: शुभ: । अभिषेके निषेके च गृहे पुंसवनादिषु । यात्रायुद्धे विवादे च चन्द्रो द्वादशग: शुभ: ।

### जन्मनक्षत्रे त्याज्यविषया:

जन्मनक्षत्रगश्चन्द्र: प्रशस्त: सर्वकर्मसु । क्षौरभैषज्यवादाध्व-कर्त्तनेषु विवर्जयेत् ।

**जन्ममासे त्याज्य:- क्षौरकर्म दीर्घयात्रा कर्णवेधश्च ॥**

### सिद्धादियोगचक्रं तिथिदिनवशेन नक्षत्रादिवशेन च

| दिनानि | रविः | सोमः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| सिद्धियोगाः | ३।८।१३ | १।६।११ | ३।८।१३ | २।७।१२ | ५।१०।१५ | १।६।११ | ४।९।१४ |
| अमृतयोगाः | ५।१०।१५ | ५।१०।१५ | २।७।१२ | १।६।११ | ३।८।१३ | ४।९।१४ | १।६।११ |
| सर्वार्थ सिद्धियोगाः | अश्वि.पुष्य ह.मू. | रो.मृ.पुष्य अनु.श्र. | अश्वि. | रो.मृ. ह.अनु. | अश्वि.पुन. पुष्य.अनु.रे | अश्वि.पुनः अनु.श्र.रे | रो.स्वा.श्र |
| मृत्युयोगाः | १।६।११ | २।७।१२ | १।६।११ | ३।८।१३ | ४।९।१४ | २।७।१२ | ५।१०।१५ |
| राज्यप्रदयोगः | x x | xx | ४।९।१४ | x x | xx | xx | ४।९।१४ |
| मध्यमयोगः | १२ | ११ | १० | ३ | ६ | २ | ७ |

### ताराचक्रम्

| ताराः | जन्म | सम्पत् | विपत् | क्षेमः | प्रत्यरिः | साधकः | वधः | मित्रम् | अतिमित्रम् |
|---|---|---|---|---|---|---|---|---|---|
| नक्षत्राणि | १।१०।१९ | २।११।२० | ३।१२।२१ | ४।१३।२२ | ५।१४।२३ | ६।१५।२४ | ७।१६।२५ | ८।१७।२६ | ९।१८।२७ |
| फलानि | मध्यमम् | शुभम् | अशुभम् | शुभम् | अशुभम् | शुभम् | अशुभम् | शुभम् | शुभम् |
| दानानि | शाकम् | x | गुडम् | x | लवणम् | x | तिलाः | x | x |

जन्मनामग्रामनक्षत्राद्वाऽभीष्टदिनावधि गणयित्वा नवभिर्हरेत् । शेषं तारा स्यात् । तत्र २।४।६।८।९ ताराः शुभदाः । १।३।७ अशुभदाः । **विशेषः**– पञ्चमतारा आवृत्तिवशेन धनदा १ सुखदा २ मृत्युदा च भवेत्तेन प्रत्यरितारायाः केवलं तृतीयावृतेस्तारा अशुभा, तत्र दानं कार्यम् ।

**कालशूलम्**–उषःकाले पूर्वस्यां, मध्याह्ने दक्षिणस्यां, सायंकाले (गोधू-ल्यां) पश्चिमायां, निशीथे चोत्तरस्यां न गच्छेत्, कालशूलदोषत्वात् ।

## ॥ पञ्चक ( भदवा ) विचारः ॥

धनिष्ठाशतभिषापूर्वभाद्रोत्तरभाद्ररेवतीनक्षत्राणि पञ्चकसंज्ञकानि । तत्र दक्षिणदिग्गमनगृहाच्छादनप्रेतदाहतृणकाष्ठादि- संग्रहशय्यावितान-निर्माणादिकं च त्यजेत् ।। तत्रापवादः- वस्वादौ शतभिग्मध्ये पूर्वादौ चोत्तरान्तके । पञ्च पञ्च घटी त्याज्या रेवतीं सकलां त्यजेत् ।

## ॥ दग्धतिथिमासान्तादिविचारः ॥

